# shrIgopAlakavacham

# શ્રીગોપાલકવચમ્

## Document Information

Text title : shrIgopAlakavacham

File name : gopAlakavacham.itx

Category : kavacha, vishhnu, vishnu

Location : doc_vishhnu

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description-comments : Brihatstotraratnakara 1 newer, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 225

Source : nAradapancharAtre jnAnAmRitasAre chaturtharAtre

Latest update : March 25, 2017

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 28, 2019

*sanskritdocuments.org*

# શ્રીગોપાલકવચમ્

શ્રીગણેશાય નમઃ ॥

શ્રીમહાદેવ ઉવાચ ।
અથ વક્ષ્યામિ કવચં ગોપાલસ્ય જગદ્ગુરોઃ ।
યસ્ય સ્મરણમાત્રેણ જીવન્મુક્તો ભવેન્નરઃ ॥ ૧॥

શૃણુ દેવિ પ્રવક્ષ્યામિ સાવધાનાવધારય ।
નારદોઽસ્ય ઋષિર્દેવિ છન્દોઽનુષ્ટુબુદાહૃતમ્ ॥ ૨॥

દેવતા બાલકૃષ્ણશ્ચ ચતુર્વર્ગપ્રદાયકઃ ।

ૐ અસ્ય શ્રીગોણાલકવચસ્ય નારદ ઋષિઃ ।
અનુષ્ટુપ્છન્દઃ । શ્રીબાલકૃષ્ણો દેવતા ।
ધર્માર્થકામમોક્ષાર્થે જપે વિનિયોગઃ ।

શિરો મે બાલકૃષ્ણશ્ચ પાતુ નિત્યં મમ શ્રુતી ॥ ૩॥

નારાયણઃ પાતુ કણ્ઠં ગોપીવન્દ્યઃ કપોલકમ્ ।
નાસિકે મધુહા પાતુ ચક્ષુષી નદનન્દનઃ ॥ ૪॥

જનાર્દનઃ પાતુ દન્તાનધરં માધવસ્તથા ।
ઊર્ધ્વોષ્ઠં પાતુ વારાહશ્ચિબુકં કેશિસૂદનઃ ॥ ૫॥

હૃદયં ગોપિકાનાથો નાભિં સેતુપ્રદઃ સદા ।
હસ્તૌ ગોવર્ધનધરઃ પાદૌ પીતામ્બરોઽવતુ ॥ ૬॥

કરાઙ્ગુલીઃ શ્રીધરો મે પાદાઙ્ગુલ્યઃ કૃપામયઃ ।
લિઙ્ગં પાતુ ગદાપાણિર્બાલક્રીડામનોરમઃ ॥ ૭॥

જગન્નાથઃ પાતુ પૂર્વં શ્રીરામોઽવતુ પશ્ચિમમ્ ।
ઉત્તરં કૈટભારિશ્ચ દક્ષિણં હનુમત્પ્રભુઃ ॥ ૮॥

આગ્નેય્યાં પાતુ ગોવિન્દો નૈરૃત્યાં પાતુ કેશવઃ ।

વાયવ્યાં પાતુ દૈત્યારિરૈશાન્યાં ગોપનન્દનઃ ॥ ૯॥

ઊર્ધ્વં પાતુ પ્રલમ્બારિરધઃ કૈટભમર્દનઃ ।
શયાનં પાતુ પૂતાત્મા ગતૌ પાતુ શ્રિયઃપતિઃ ॥ ૧૦॥

શેષઃ પાતુ નિરાલમ્બે જાગ્રદ્ભાવે હ્યપામ્પતિઃ ।
ભોજને કેશિહા પાતુ કૃષ્ણઃ સર્વાઙ્ગસન્ધિષુ ॥ ૧૧॥

ગણનાસુ નિશાનાથો દિવાનાથો દિનક્ષયે ।
ઇતિ તે કથિતં દિવ્યં કવચં પરમાદ્ભુતમ્ ॥ ૧૨॥

યઃ પઠેન્નિત્યમેવેદં કવચં પ્રયતો નરઃ ।
તસ્યાશુ વિપદો દેવિ નશ્યન્તિ રિપુસઙ્ઘતઃ ॥ ૧૩॥

અન્તે ગોપાલચરણં પ્રાપ્નોતિ પરમેશ્વરિ ।
ત્રિસન્ધ્યમેકસન્ધ્યં વા યઃ પઠેચ્છૃણુયાદપિ ॥ ૧૪॥

તં સર્વદા રમાનાથઃ પરિપાતિ ચતુર્ભુજઃ ।
અજ્ઞાત્વા કવચં દેવિ ગોપાલં પૂજયેદ્યદિ ॥ ૧૫॥

સર્વં તસ્ય વૃથા દેવિ જપહોમાર્ચનાદિકમ્ ।
સશસ્ત્રઘાતં સમ્પ્રાપ્ય મૃત્યુમેતિ ન સંશયઃ ॥ ૧૬॥

ઇતિ નારદપઞ્ચરાત્રે જ્ઞાનામૃતસારે ચતુર્થરાત્રે
શ્રીગોપાલકવચં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

---

*shrIgopAlakavacham*
pdf was typeset on December 28, 2019

Please send corrections to *sanskrit@cheerful.com*